श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीलक्ष्मीकुमारतातदेशिक कृत

# ॥ श्री हनुमद्विंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री हनुमद्विंशतिः ॥

गुणाभिराममिन्दिराकुमारताततवारिधि-
    प्रसिद्धिमद्रमातटाकतीरसीम्नि मारुतिम्।
मुदाधिरुह्य माधवो वृषाचलस्थलादपि
    प्रकल्पते निकाममत्र पालनाय देहिनाम्॥ १ ॥

अधिरुह्य रघूद्वहो हरिं प्राक्
    अरिशिक्षामकृताधुना तु सोऽयम्।
कृततातसमुद्रतीरकेलिं
    तमधिष्ठाय तनोति दीनरक्षाम्॥ २ ॥

कर्मानुरुध्य वृषभूभृति यः करोति
    नृणां हितानि स तु तन्निरपेक्ष एव।
यत्सर्वमिष्टमिह पुष्यति वेङ्कटेश-
    स्तद्वैभवं किल रमात्मजतातसिन्धोः ॥ ३ ॥

क्रीडासरः किमपि तातसमुद्रनाम
    लक्ष्म्याः प्रसन्नलघुशीतलमर्पयन्त्याः।
अन्यद्विधेयमनवेक्ष्य सुतानमुष्याः
    प्रीत्यै मुरारिरवति प्लवगाधिरूढः ॥ ४ ॥

श्रीशैलपूर्णमवति स्म घटाम्बुहृष्टो
    यः पूर्वमञ्जनगिरौ स पुमानिदानीम्।
स्थित्वा समीरभुवि पाति रमाकुमार-
    तातामबुराशिमुदितो जनमैन्दिरेयम्॥ ५ ॥

हरिः पुरा मामधिरुह्य दारुणं
    चकार कर्मेति समीरजन्मनः।

www.prapatti.com

शुचं निराकर्तुमिवाश्रितः स तं
 शुभं नृणां सौति रमासरस्तटे॥ ६॥

शौरेः रमातनयतातसमुद्रतीरे
 भावस्तटादपि भवात्मजपुष्करिण्याः।
सन्तन्वते हि पुरुषाः समदर्शिनोऽपि
 प्रायेण सूनुषु निजेष्वपि पक्षपातम्॥ ७॥

श्लाघ्यतरक्षीराब्धि-
 श्रीतातसमुद्रयोरियान्भेदः।
निद्राति तत्र नित्यं
 श्रीपतिरनुकूलमत्र जागर्ति॥ ८॥

फणिसरसीतटभागात्
 अधिको लक्ष्मीसरस्तटाभोगः।
गजवरदः किल तस्मिन्
 क्रीडति हरिरत्र सर्ववरदायी॥ ९॥

रामचन्द्रोदयारम्भे यस्सुवेलातिवर्तनम्।
चक्रे समुद्रस्तं वन्दे श्रीसरस्तीरपावनिम्॥ १०॥

तटसीमनि तातसिन्धु बन्धो-
 रमितं क्रीडति भाग्यमञ्जनायाः।
अकरोत्सहसा यदक्षशिक्षां
 नियमेनैव निजेन बाहुधाम्ना॥ ११॥

नमत रमाकमलाकरलहरीपरिवाहसरणिवास्तव्यम्।
हरिसार्वभौममानतभरणोद्यतशौरिभारधौरेयम्॥ १२॥

निजतनुकनकाद्रिमेत्य नाथे
 विहरति वल्लभया समं प्रहृष्टे।
हरिरवति जगन्ति तातसिन्धो-
 रधितटमात्मसुभृत्यतानुरूपम्॥ १३॥

चतुर्भुजः श्रीसरसीहरीन्द्र-
हस्तेन दत्ते वरमाश्रितानाम्।
यदर्थिने भृत्यमुखेन दानं
प्रायः प्रभूणां प्रकृतिस्वभावः ॥ १४ ॥

इदं प्रकर्षाय हरेर्यदार्तान्
संरक्षति श्रीस्सरसीहनूमान्।
महेश्वराणां महते गुणाय
प्रकल्पते भृत्यजनप्रभावः ॥ १५ ॥

श्रीसूनुतातगुरुसिन्धुतटाञ्जनेये
संप्रत्यशेषजनतावनजागरूके।
लक्ष्म्या हरिर्विहरते यदेष सीता-
वियोगदिनक्लृप्ततपोविलासः ॥ १६ ॥

प्रायस्तुल्यः पादुकायमिहापि
न्यासस्सीतानायकाङ्घ्रेस्तथापि।
धात्रीरक्षां सा ततानेति किं वा
लोकान् पाति श्रीतटाकाञ्जनेयः ॥ १७ ॥

इन्दिरासुहृदभेदभावना-
सन्ततेरिव तदात्मतां वहन्।
तन्तनीति कमलासरस्तटी-
गन्धवाहतनयो जनावनम्॥ १८ ॥

नारायणीयेन महोभरेण
नटत्प्रकर्षो जगतां त्रयाणाम्।
करोति रक्षां कलशाब्धिकन्या-
सरस्तटीमारुतिसार्वभौमः ॥ १९ ॥

कंसारितेजोभरवैभवेन
संसारिणामेष तनोति रक्षाम्।



www.prapatti.com

रमासरस्यां रघुवीरसेना-
    नासीरसीमाभटसार्वभौमः ॥ २० ॥

इतीन्दिरातटाकतीरवायुसूनुविंशतिं
    रमाकुमारतातयार्यनिर्मितां पठन्ति ये।
धनं यशो बलं सुतानरोगतायुषी सुखं
    लभेयुरेव मानवाः कृपाभराद्रमापतेः ॥ २१ ॥

यथा हरिर्भासुरपुण्यकोट्यां
    यथा च गौरी वरकामकोट्याम्।
तथा महोदारकुमारतात-
    कल्याणकोट्यां कमला समिन्धे॥ २२ ॥

कुर्वन्ति ब्राह्मणानां तु
    कल्याणशतमन्वहम्।
तस्मात् कल्याण कोटीति
    सत्यनामा प्रकाशते॥ २३ ॥

॥ इति श्री हनुमद्विंशतिः संपूर्णा ॥

www.prapatti.com